Library IIAS, Shimla
S 491.25 K 962 A
00115274

# ĀRṢAPRAYOGASĀDHUTVANIRŪPAṆAM

EDITED BY

DR. K. KUNJUNNI RAJA

S
491.25
K 962 A

THE ADYAR LIBRARY AND RESEARCH CENTRE

S
491.25
K962A

*INDIAN INSTITUTE*
*OF*
*ADVANCED STUDY*
*LIBRARY, SHIMLA*

TPH 10/

# ĀRṢAPRAYOGASĀDHUTVANIRŪPAṆAM

EDITED BY

DR. K. KUNJUNNI RAJA

THE ADYAR LIBRARY AND RESEARCH CENTRE

Adyar Library Pamphlet Series, No. 43
(*Reprint from The Adyar Library Bulletin, Vol. 42*)

© 1979 The Adyar Library and Research Centre
Adyar, Madras 600020, India

S
491.25
K962A

ISBN: 0-8356-7541-6

**Agents for Publications of**
**The Adyar Library and Research Centre**

AMERICAS, JAPAN
The Theosophical Publishing House,
P. O. Box 270, Wheaton, Illinois 60187, U.S.A.

AUSTRALIA, NEW ZEALAND, INDONESIA AND FIJI ISLANDS
The Theosophical Society in Australia
121, Walker Street,
North Sydney 2060, N.S.W., Australia

EUROPE AND THE UNITED KINGDOM
The Theosophical Publishing House,
68, Great Russell Street, London, WCIB 3BU, England

INDIA AND OTHER COUNTRIES
The Theosophical Publishing House,
The Theosophical Society,
Adyar, Madras 600020, India

Library IIAS, Shimla
S 491.25 K 962 A
00115274

PRINTED IN INDIA
At the Vasanta Press, The Theosophical Society,
Adyar, Madras 600020

Indian Institute of Advanced Study
115274
12·8·04
SHIMLA

# INTRODUCTION

In my introduction to the edition of the *Mukhabhūṣaṇa* published from the Adyar Library and Research Centre in 1973 (*Adyar Library Bulletin*, vol. 37, and Adyar Library Pamphlet Series no. 41), I have referred to the existence of the *Ārṣaprayogasādhutvanirūpaṇa* similar to the *Mukhabhūṣaṇa* and probably written by the same author. This work is now edited here mainly on the basis of a manuscript available in the Madras Government Oriental Manuscripts Library and described as MT. 4400a: Palmleaf manuscript, 8 3/8 × 1/4 inches, folia 1-20, 8 lines per page, in Malayalam. A restored copy in Devanagari is available as MT. 7133 (paper manuscript). The same codex also contains the *Mukhabhūṣaṇa*. Another manuscript of the work is available in the Kerala University Manuscripts Library, described as *Mukhabhūṣaṇa*. I have read it, and find that it does not differ from the Madras manuscript which is clearly written.

The *Ārṣaprayogasādhutvanirūpaṇa* was written after the *Mukhabhūṣaṇa* by the same author. Verses quoted fully in the *Mukhabhūṣaṇa* are quoted here by the *pratīka* alone as in the case of *gaurīpūrṇavapu* (2, p. 4) and *dhātvarthasyaiva* (24, p. 15). He refers to the *Mukhabhūṣaṇa* statements as *pūrvam uktam* (23, p. 14)

and *yathoktam* (24, p. 15). Two verses are quoted from the *Jagannāthastuti* in the *Mukhabhūṣaṇa*; in the present work those verses are referred to and another verse from the same *stotra* is quoted.

In the *Mukhabhūṣaṇa* the attempt was to explain some irregular usages in classical texts and Itihāsa-s within the framework of Pāṇini's rules, by suitable interpretations on the model of Vāmana's *Kāvyālaṃkārasūtravṛtti* (last chapter). In the present text the author tries to explain deviations from Pāṇini's grammar found in the Itihāsa-s and Purāṇa-s on the basis of the Vedic rules of Pāṇini. Though the Itihāsa-s and Purāṇa-s are not Vedic texts, they could contain influences of Vedic usages. The author suggests that sages like Vālmīki and Vyāsa sometimes resort to Vedic usages, since their minds are saturated with Vedic texts. Even though some of his arguments may not be acceptable to all, they are interesting at least as a *tour de force* in the field of grammar.

# आर्षप्रयोगसाधुत्वनिरूपणम्

**प्रणम्य परमात्मानं विमुक्तोपाधिविप्लवम् ।**
**इतिहासे पदं किंचिद् यथाशक्ति निरूप्यते ।।**
**नूनमार्षप्रयोगोऽयमित्येवोक्ताविहापतेत् ।**
**अपशब्दाशयत्वं वा मुग्धत्वं वा निजं भृशम् ।।**
**अभिनन्दितसूक्तस्य स्वयमेव स्वयंभुवा ।**
**वाल्मीकस्य मुनेर्वाचि कोऽवाच्यं वक्तुमर्हति ।।**
**अधीती शब्दशास्त्राणां षष्टौ द्वैपायनो विभुः ।**
**कृती निजकृतौ कुर्यात् कथमेवापभाषणम् ।।**

पुरावृत्तवर्तिनां शब्दानां साधुत्वं विज्ञातव्यम् ।

1. सभापर्वणि (2. 68. 8)

'ज्ञास्यन्ति तेऽऽत्मानमिमेऽद्य पाण्डवा
विपर्ययात् षण्डतिला इवाफलाः ।'

अत्रात्मशब्दाकारस्य लोपः । 'मन्त्रेष्वाङ्यादेरात्मनः ।' (6. 4. 141) आङि परत आत्मन्शब्दस्यादेर्लोपः स्यान्मन्त्रेषु । आङोऽन्यत्रापि दृश्यते लोपः । ननु च मन्त्रेष्विदं वेदापरपर्यायेषु कथितम्, न पुराणादौ । उच्यते । छन्दोवदार्षं भवति । वेद इवेतिहासपुराणेषु केचिद् वैदिकप्रयोगा ऋषिभिः क्रियन्ते । अवैदिके वैदिकप्रयोग इति किमेतत् । मैवम्, नात्र पर्यनुयोगो युक्तः ।

स्वभावोऽयं महर्षीणां यत् क्वापि स्वकृतिष्वमी ।
स्वाध्यायाभिमुखात्मानः कुर्वन्ति च्छान्दसं पदम् ।।

एवमारण्यपर्वणि (3. 197. 44)

' विनिन्दन् स द्विजोऽऽत्मानं कौशिको नरसत्तम । '

इत्यादौ ।

2. ' गौरीपूर्णवपुः ' [. . . **त्रियम्बकम्**]

इत्यादौ ' इयङुवङ्प्रकरणे तन्वादीनां छन्दस्युपसंख्यानं बहुलम् ' इतीयङादेशः । ' स्वयं**भूवारा**ध्यम् ' इत्यत्र तथा चान्द्रन्यायेन निर्वाहः ।

3. आस्तिके

' त ऊचुरमृता**र्थेदं** निर्वहिष्याम ते जलम् । ' अत्र ' एङः पदान्तादति ' (6. 1. 109) इति पूर्वरूपत्वं कथम् ? सर्वविधीनां छन्दसि विकल्प इति न्यायाद् इति परतोऽप्येङः पूर्वपरयोः पूर्वरूपत्वम् । ननु ' एङः पदान्तादति ' इत्यस्योक्तन्यायेन छन्दस्यति परत एव विकल्पो युक्तः, नान्यत्र पूर्वरूपत्वादेशः । नैतत्, विकल्पकार्यस्य विवक्षावशादेव सिद्धेः । अयं पुनर्न्यायोऽनत्यपि पूर्वरूपत्वमापादयति । ' छन्दसि बहुलम् ' इति भोजसूत्रम् । तत्तत्कार्यं वेदे बहुलं स्यादित्यस्य वृत्तिः । एवं श्रीसहस्रनामनि (श्लो. 135)

' जगद् वशे **वर्ततेदं** कृष्णस्य सचराचरम् । ' इत्यादौ ।

संभवे (1. 70. 41)

' अहं जरां समास्थाय राज्ये स्थास्यामि **तेऽऽज्ञया** । '

अत्राप्यनति पूर्वरूपत्वम् ।

पौलोमे (1. 1. 65)

'दु:शासन: पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रोऽम्बिकेय: ।'

अत्रापि 'अतो रोरप्लुतादप्लुते' (6. 1. 113) इत्यस्य छान्दसविकल्पादाकारेऽपि परतो रोरुत्वम् । तथा पूर्वरूपत्वं च ।

4. बालकाण्डे (1. 69. 19)

'अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्यय: ।'

अत्र तेन न्यायेन उत्वं न भवति । पुनर्भो भगो इत्यादिना (8. 3. 17) यत्वम् । ततो लोपादि च ।

संभवे (1. 128. 12)

'राजासीद् दक्षिणे कूले भागीरथ्याहमुत्तरे ।'

अत्र 'पूर्वत्रासिद्धम्' (8. 2. 1) इत्यस्य छान्दसविकल्पादसिद्धत्वाभावपक्षे सवर्णदीर्घ: । एवं बालकाण्डे (1. 19. 3)

'इयमक्षौहिणी पूर्णा यस्याहं पतिरीश्वर: ।'

इत्यादौ च ।

5. किष्किन्धाकाण्डे (4. 26. 13)

'पृथिवीमपि वीर त्वं ससागरवनाचलाम् ।
परिवर्तयितुं शक्त: किमङ्ग पुन रावणम् ।।'

ढ्लोपे दीर्घस्य (6. 3. 113) छान्दसविकल्पात् पक्षे दीर्घाभाव: ।

6. श्रीभागवते (10. 29. 2)

'**ततोडुराजः** ककुभः करैर्मुखं
प्राच्या विलिम्पन्नरुणेन शंतमैः ।'

अत्रानत्यपि उत्वं पूर्वरूपत्वं च ।

7. आस्तिके (1. 14. 5)

'आस्तां भगिन्यौ रूपेण **समवेतेऽद्भुतेऽनघे** ।'

अत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्' (1. 1. 11) इत्यस्य छान्दसविकल्पात् प्रगृह्यत्वाभावपक्षे पूर्वरूपत्वम् ।

लैङ्गे

'**अहोऽद्भुतं** मया दृष्टं दुःखधात्री ह्यहं विभोः ।'

अत्र 'ओत्' (1. 1. 15) इत्यस्य विकल्पः ।

8. श्रीभागवते (2. 6. 14)

अन्ये च विविधा जीवा जलस्थ**लनभौकसः** ।

अत्र तु नैष न्यायः स्यात् । नभःशब्दसमानार्थो नभशब्दोऽप्यस्ति । तस्यैवायं प्रयोगः ।

प्रायो **नसन्ताः** शब्दाः स्युरदन्ताश्च द्व्यचो यथा ।
**जन्मे जन्मे** यदभ्यस्तं मरणे च तथाम्बरे(?) ॥

एवम्,

गन्धर्वविद्याधरचारणेशा
ये यक्ष**रक्षोरग**नागनाथाः । (भागवते 2. 6. 43)

इत्यादौ । एवं च संभवे (1. 55. 13 fn. 486. 5)

'ततोऽष्टादशभिः **पर्वैः** संगृहीतं महर्षिणा ।' इत्यादि । किष्किन्धाकाण्डे (4. 3. 11) 'विशाल**वक्षौ** दुर्धर्षौ मानुषौ वरवर्णिनौ ।' इत्यादि चोपपन्नम् ।

9. श्रीहरिवंशे

**सो वः** पातु षडर्धविक्रमगतिस्त्रैलोक्यनाथो हरिः ।

अत्र 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ।' (6. 1 132) इत्यस्य छान्दसविकल्पाद् हल्यपि सुलोपाभावः । एवं संभवे (1. 92. 41)

राजानं रमयामास यथा रम्येत **सो पितुः** । इत्यादौ । उत्तररामायणे (7. 32. 14) 'बृहत्सालप्रतीकाशः कोऽप्ये**षो राक्षसे**श्वरः ।' इत्यादौ (च) ।

10. उद्योगे (4. 25. 14 fn. 522)

घ्राणैः पश्यन्ति पशवो वेदैः पश्य**न्ति ब्राह्मणाः** ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ।।

अत्र 'अनचि च' (8. 4. 47) इत्यस्य छान्दसविकल्पात् पक्षे द्वित्वाभावः ।

एवं संभवे (1. 219. 39)

तं हन्तुं नै**च्छद्दाशार्हः** पावको न ददाह च । ' इत्यादौ ।

11. 'प्रतिष्ठा नः पुरवरं गङ्गा**यमुन**संगमे ।'

'अत्र ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' । (6. 3. 63) ङ्यन्तानामाबन्तानां च वहुलं ह्रस्वो भवति संज्ञायां छन्दसि च विषये । इति ह्रस्वः ।

एवं जगन्नाथस्तुतौ

शङ्खन्युङ्ककरारुणतामरसस्थगितदितिकुलप्रौढ ।
सागरपुत्रिमुखाम्बुजषट्पद भगवन् नमस्तुभ्यम् ॥

इत्यादौ । अत एव संज्ञायां **कालिदास** इत्यादि ।

12 (a) लैङ्गे (1. 64. 15)

स्नुषावाक्यं ततः श्रुत्वा **वसिष्ठोत्थाय** भूतलात् ।

अत्र वसिष्ठेति लुप्तसुप्कं पदम् । कथम् ? 'सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः' (7. 1. 39) । सुपां स्थाने सुलुक् पूर्वसवर्णम् आ, आत्, शे, या, डा, ड्या, याच्, आल् इत्येते आदेशा भवन्ति ।

(b) संभवपर्वणि (1. 213. 64)

'स सात्वत्यामतिरथः संबभूव धनंजयात् ।
मखे निर्मथ्य**मानेव** शमीगर्भाद्धुताशनः ॥'

अत्र ङसेर्लुक् । निर्मथ्यमानादिति प्राप्तम् ।

(c) श्रीभागवते (1. 15. 21)

सर्वं क्षणेन तदभूदसदीशरिक्तं
**भस्मन् हुतं** कुहकराद्धमिवोप्तमूष्याम् ।

अत्र भस्मनीति प्राप्ते भस्मन्निति ङेर्लुक् ।

(d) बालकाण्डे (1. 2. 14)

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

अत्र 'सुपां सुपो भवन्तीति वक्तव्यम् ।' इति ङेर्ङस्यादेशः । क्रौञ्चमिथुन इति प्राप्तनिर्धारणे हि सप्तम्या षष्ठ्या वा भवितव्यम् । अथवात्र सुपां सुलुगित्यादिना ङेराादेशः ।

(e) इतिहाससमुच्चये (महाभारते 13. App. 20. 437 pr.)

प्राप्य स्वर्गं क्रमादूर्ध्वमशेषैः सहिताः पुनः ।
**स्वर्गादुपरि** लोकानां गत्वा गोलोकमाश्रिताः ।।

अत्र स्वर्गस्योपरीति प्राप्ते ङसो ङसिः । उपरिशब्दस्थाने हि 'षष्ठ्यतसर्थप्रत्ययेन ।' (2. 3. 30) इति षष्ठी युक्ता । लोकानामुपरीति वान्वयः ।

(f) किष्किन्धाकाण्डे (4. 52. 24)

**वधेनाप्रतिरूपेण** मृत्युः श्रेयानिहैव नः ।

अत्र ङसेष्टादेशः । वधादिति खलु प्राप्तिः ।

विभक्तपञ्चमी स्यात् ।

(g) एवं पौलोमे (1. 1. 180)

'हित्वा तु विपुलान् भोगान् बुद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास्तव **पुत्रैर्महत्तराः**'

इत्यादौ ।

(h) कथमैश्वर्यविभ्रष्टाः सहसा **दुःखमीयुषः** ।
वने विजह्रिरे पार्थाः शक्रप्रतिमतेजसः ।।
(ibid., 3. 1. 3)

अत्र जसः शस् ईयिवांस इति प्राप्ते । 'उपेयिवाननाश्वाननूचानश्च' (3. 2. 109) इत्यत्र ह्युक्तम् । न चात्रोपसर्गस्तन्त्रम् । एकवचनं च । अन्योपसर्गान्निरुपसर्गाच्च भवत्येवेति । ततः स्थानिवद्भावस्य छान्दसविकल्पात् संप्रसारणम् ।

संभवपर्वणि (1. 171. 22)

'सदाग्निमुद्गिरन् वक्त्रात् पिब**त्यापो** महोदधौ ।'

इत्यादौ तथाविधाया दीर्घः ।

(i) उत्तररामायणे (7. 35. 31)

'**यमेव दिवसं** ह्येष ग्रहीतुं भास्करं प्लुतः ।
**तमेव** दिवसं राहुर्जिघृक्षति दिवाकरम् ।।'

अत्र ङेरमादेशः । यस्मिन् दिवसे तस्मिन् दिवसे इति प्राप्तम् । एवमाश्रमपर्वणि (15. 17. 3)

'धृतराष्ट्रो महाराज वनवासाय दीक्षितः ।
गमिष्यति वनं राजा **कार्तिकीमागतामिमाम्** ।।'

इत्यादौ ।

(j) ततोडुराज इत्यादौ **अरुणेने**त्यत्र (6, पृ. 280) भिसष्टादेशः । **अरुणैः** करैरिति प्राप्तिः ।

(k) आरण्यपर्वणि (3. 242. 24)

विवेश हास्तिनपुरं सहितः **कर्णसौबलैः** ।

अत्र भ्यामो भिसादेशः ।

(l) श्रीभागवते (10. 5. 11)

गोप्यः सुमृष्टमणिकुण्डलनिष्ककण्ठच-
श्चित्राम्बराः पथि शिखाच्युतमाल्यवर्षाः ।
नन्दालयं सवलया **व्रजतीर्विरेजु-**
व्यालोलकुण्डलपयोधरहारशोभाः ॥

अत्र तु पूर्वसवर्णदीर्घः । 'वा छन्दसि' (6. 1. 106) 'दीर्घाज्जसि च' इचि च परतः पूर्वसवर्णदीर्घो वा भवति ।

(m) एवं संभवपर्वणि (1. App. 114. 80)

'कन्यापुरगताः कन्याः प्रयच्छन्ति **यशस्विनीः** ।'

इत्यादौ ।

13. तदेषा दीयतां **तस्य याचमानस्य** सामतः ।

(रामायणे, 7. 11. 24 fn. 198) इत्यत्र 'चतुर्थ्यर्थे बहुलं छन्दसि' (2. 3. 62) । छन्दसि चतुर्थ्यर्थे बहुलं षष्ठीविभक्तिर्भवतीति वा षष्ठी ।

श्रीभागवते (1. 14. 11)

'ऊर्वक्षिबाहवो **मह्यं** स्फुरत्यङ्ग पुनः पुनः ।'

अत्र 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति वचनात् चतुर्थी । इदमपि छन्दोविषयम् । एवम्

'धर्मस्य मम **तुभ्यं** स्वकुमाराणां भवस्य च ।'

इत्यादौ ।

14. आरण्यपर्वणि (3. 197. 41)

'माता**पितृभ्यां** शुश्रूषुः सत्यवादी जितेन्द्रियः ।'

अत्रौटो भ्यामादेशः । न लोकेत्यादि (2. 3. 69) निषेधाद् द्वितीया प्राप्ता ।

15. 'नमो भृगूणां **पतये** दृप्तक्षत्रवनच्छिदे ।'

अत्र 'षष्ठीयुक्तश्छन्दसि वा' (1. 4. 9) । षष्ठ्यन्तेन शब्देन युक्तः पतिशब्दः छन्दसि वा घिसंज्ञो भवतीति घिसंज्ञापक्षे 'घेर्ङिति' (73. 1. 11) इति गुणः ।

किष्किन्धकाण्डे (4. 17. 36)

'प्रमदा शीलसंपन्ना **पतिनेव** विधर्मिणा ।'

अत्र छान्दसविकल्पात् 'शेषो घ्यसखि' (1. 4. 7) इत्यनेन घिसंज्ञापक्षे रूपम् ।

16. 'स्वजनः पूजितः सम्यक् **प्रकृत्यश्**चानुरञ्जिताः ।' अत्र 'जसि च' (7. 3. 109) इति गुणस्य छन्दसि विकल्पेनाभावपक्षे यणादेशः ।

17. संभवपर्वणि (1. 67. 31 fn. 621. 2)

पस्पर्श चैनां पाणिभ्यां सुतां **श्रीमिव** रूपिणीम् ।

अत्र तथा विकल्पादियङादेशाभावे पूर्वरूपत्वम् ।

आरण्यपर्वणि (3. 222. 38) 'नित्यमार्यामहं कुन्तीं **वीरसूं** सत्यवादिनीम् ।' अत्राप्युवङादेशाभावः । पूर्वरूपत्वं च ।

18. ' सर्वतः **पुष्करिण्यैश्च** उद्यानैरुपशोभिताम् । '

(महाभारते 13 App. 20. 22)

अत्रापि तथा विकल्पबलादनतोऽपि परस्य भिस ऐसादेशः । नन्वत एव परस्य भिस ऐसादेशे विकल्पो युक्तः, न पुनरीकारपरस्य भिस ऐसादेशः । मैवम्; अतः परस्य हि ' बहुलं छन्दसि ', छन्दसि भिसोऽकारान्तादङ्गादुत्तरस्य बहुलमैसादेशो भवतीत्येव सिद्धिः । यदि वा बहुलग्रहणसामर्थ्यादीतः परस्य भिस ऐस् ।

19. शल्यपर्वणि (9. 34. 41)

' **पत्नयस्त**स्य राजेन्द्र सोमस्य शुभलक्षणाः । '

अत्र यणादेशस्य तथा विकल्पादभावे ' जसि च ' (7. 3. 109) इत्यत्र बाहुलकत्वेन गुणो दीर्घस्यापि भवति ।

20. संभवपर्वणि (1. 80. 12)

' अभिषेक्तुकामं नृपतिं पूरुं पुत्रं **कनीयसम्** । '

अत्र ' उगिदचां-- ' (7. 1. 70) इत्यादिना नुमः छान्दसन्यायाद् विकल्पः । ' अनित्यमागमशासनम् ' (परिभाषेन्दु. 96) इति वचनाद् वा ।

21. किष्किन्धाकाण्डे (4. 29. 30)

' अन्योन्यबद्धवैराणां मानिनां **विजिगीषुणाम्** । '

अत्र ' नामि ' (6. 4. 3) इति दीर्घस्य तथा विकल्पः ।

22. सभापर्वणि (2. 66. 33)

' न शास्त्रं शास्ति दुर्बुद्धिं श्रेयसे **वेतराय** वा । '

अत्र ‘ सर्वनाम्नः स्मै ’ (7. 1. 14) इत्यस्य विकल्पाद् यादेशः ।

23. संभवपर्वणि (1. 119. 20)

फलानि वृक्षमारुह्य **प्रविचिन्वन्ति** ते यदा ।
तदा पादप्रहारेण भीमः **कम्पयते** महीम् ।।

अत्र प्रविचयस्य वर्तमानत्वं न विवक्षितम् । कम्पनस्य च । एवं सुन्दरकाण्डे (5. 55. 7)

‘ **प्रविशन्न**भ्रजालानि **निष्पतंश्च** पुनः पुनः ।
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव **लक्ष्यते** ।।

इत्यादौ । आरण्यपर्वणि (3. 180. 41)

‘ तमर्चितं सुविश्वस्तमासीनमृषिसत्तमम् ।
ब्राह्मणानां मते**नाह** पाण्डवानां च केशवः ।। ’

इत्यादौ आहशब्द उवाचार्थः, न तु ब्रवीतेर्लटि रूपम् । तथा चाव्ययसूत्रम् ‘ आसाह लिडर्थे ’ (I. 126) इति पूर्वमुक्तम् ।

(मुख. पृ. 52)

24. विराटपर्वणि (4. 53. 55)

‘ अथान्तरिक्षे नादोऽ**भूद्** द्रोणं तत्र प्रशंसताम् ।
दुष्कृतं कृतवान् द्रोणो यदर्जुन**मयोधयत्** ।। ’

अत्राभूदिति भूतमात्रविवक्षया, यथात्र कृतवानिति । अयोधयदिति भूतानद्यतनमात्रविवक्षया । सर्वत्रैव ह्यत्र लिट् युज्यते, क्रियाणां भूतानद्यतनपरोक्षत्वात् । ननु प्रयोक्तुरदर्शनविषयः परोक्षः । प्रयोक्ता त्वत्र महर्षिर्बादरायणः । न खलु तस्य किंचिदप्रत्यक्षं

नाम । संयमिनो हि देशकालस्वभावविप्रकृष्टमपि सकलं पदार्थ-जालं करतलनिहितबदरीफलमिवावलोकयन्ति । यस्त्वत्र क्व-चिल्लिट्प्रयोगः स छान्दसः 'छन्दसि लिट्' (3. 2. 105) इति । तत्र 'भूते' इत्येव वर्तते । न तु परोक्षप्रसङ्गः । सत्यम्, किंतु महर्षीणामपि लोकदृष्टया प्रत्यक्षपरोक्षादिविभागव्यवहारो भवेत् । तथा च वसिष्ठादयो महात्मानः प्रशान्तविकल्पवेल्ल-नज्वरा अपि निरतिशयानन्दपरमधामनिलीना अपि लौकिकीं स्थितिमनुरुध्यमानाः श्रूयन्ते ।

आरण्यपर्वणि (3. 13. 99)

'ततो**ऽगच्छन्ने**कचक्रां पाण्डवाः संशितव्रताः ।'

इत्यादिद्रौपद्युक्तौ कथं लङादिप्रयोगः । न खलु तस्यां समाधिप्रकर्षः प्रसिद्धः ।

तस्मात् क्वचित् किंचिद् विवक्ष्यते इति स्थितम् । यथोक्तम 'धात्वर्थस्यैवेत्यादि ।' (मुख. पृ. 54)

25. बालकाण्डे (1. 9. 16)

'ऋषिपुत्रवचः श्रुत्वा सर्वासां मति**रास** वै ।

तदाश्रमपदं द्रष्टुं जग्मुः सर्वाश्च तेन ह ॥'

अत्रासेति बभूवार्थमव्ययम् ।

26. संभवपर्वणि (1. 165. 20)

'यथेच्छसि तथा क्षिप्रं कुरु त्वं **मा** विचारय ।

अत्राङितो माशब्दस्य प्रयोगः । ङितस्तु योगे 'माङि लुङ' (3. 3. 175) इति लुङ स्यात् ।

27. आरण्यपर्वणि (3. 14. 1)

'नेदं कृच्छ्रमनुप्राप्तो भवान् स्याद् वसुधाधिप ।
यद्यहं द्वारकायां **स्यां** राजन् संनिहितः पुरा ॥'

अत्र हेतुहेतुमद्भावमात्रं विवक्षितम् । न तु क्रियातिपत्तिः । अतो न लृङ ।

'प्राप्तः स्याद् यद्यहं वीर वधं तस्मिन् महारणे ।
श्रेयस्तद् **भविता** मह्यमेवं भूतं न जीवितम् ॥'

(आरण्यपर्वणि 3. 238. 8)

अत्र 'हेतुहेतुमतोर्लिङ' (3. 3. 156) इत्यस्य विकल्पात् पक्षे लुट् ।

28. '**अयाचं** तमहं विप्रं शापस्यान्तो भवेदिति ।

(महाभारते 3. 178. 39)

अत्र कर्तुः क्रियाफलप्राप्तिर्न विवक्षिता । अतः परस्मैपदम् । एवम्

'**सोऽयजत्** पृथिवीपालः क्रतुभिर्भूरिदक्षिणैः ।'

(महाभारते, 3. 126. 5 )

'शुश्रूषुराचार्यवशानुवर्ती
दीर्घं कालं ह्यध्ययनं **चकार** ।'

(महाभारते 3. 132. 6 )

इत्यादौ ।

29. 'मासे पूर्णे बिलं गत्वा हरयो **नावबुध्यत**। अत्र झस्य स्थाने तप्रत्ययः, तिङ्व्यत्ययात्। कथम्। 'व्यत्ययो बहुलम्' (3. 1. 85) इत्यत्र ह्युक्तम्,

सुप्तिङुपग्रहलिङ्गनराणां
कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां
सोऽपि च सिध्यति बाहुलकेन ॥'

इति। तथा च कश्चिच्छ्लोकः—

'पादौ सन्ति करौ सन्ति दातारोऽस्ति क्वचित् क्वचित्।
विस्तीर्णा पृथिवी सन्ति किमर्थं दीनभावनैः ॥'

इति। एवमारण्यपर्वणि (3. 197. 12)

'उच्छिष्टं **भुञ्जते** भर्तुः सा तु नित्यं युधिष्ठिर।'

इत्यादौ।

युद्धकाण्डे (6. 101. 39)

'युक्ता रामस्य भवती धर्मपत्नी यशस्विनी।
प्रतिसंदिश मां देवि **गमिष्ये** यत्र राघवः ॥'

अत्र उपग्रहव्यत्ययः। उपग्रह इति परस्मैपदस्यात्मनेपदस्य च संज्ञा एव।

'**शृणुष्वा**वहितो राजन् राज्ञस्तस्य महात्मनः।'
(महाभारते 3. 126. 4)

'पन्था अयं तेभ्य मयातिसृष्टो
**येनेच्छसे** तेन कामं व्रजस्व ।'
(महाभारते 3. 133. 2)

इत्यादौ ।

'सर्वे तथा वक्र **एवाभ्यजायन्**
अष्टावक्रः प्रथितो मानवेषु ।'

अत्रात्मनेपदव्यत्ययः ।

'सर्वाश्च **गर्भानलभं**स्ततस्ताः पार्थिवाङ्गनाः ।'
(महाभारते 3. 128. 5)

इत्यादौ । संभवपर्वणि (1. 217. 13)

शरैरभ्याहतानां च **दह्यतां** च वनौकसाम् ।
विरावः श्रूयते ह स्म समुद्रस्येव मथ्नतः ।।

अत्र शानज्व्यत्ययः । एवमारण्यपर्वणि (3. 188. 54)

'आत्मच्छन्देन **वर्तन्तो** युगान्ते पर्युपस्थिते ।' इत्यादौ ।

30. श्रीभागवते (10. 49. 30)

'इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ।
सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीं **गमत्** ।।'

अत्राडागमो न भवति । 'बहुलं छन्दस्यमाङ्योगेऽपि' (6. 4. 75) बहुलं छन्दसि विषये अमाङ्योगेऽप्यडागमो न भवति । अपिशब्दाद् माङ्योगेऽपि । एवं संभवपर्वणि (1. 124. 26)

'गन्धर्वनगराकारं प्रेक्षका विस्मिता **भवन्** ।'

इत्यादौ ।

‘ मा निषाद प्रतिष्ठां त्व**मगमः** शाश्वतीः समाः । ’

(रामायणे 1. 2. 14)

अत्रानेनैव सूत्रेण माङ्योगेऽप्यडागमः ।

एवं किष्किन्धाकाण्डे 4. 29. 48, 33. 18

‘ समये तिष्ठ सुग्रीव **मा** वालिपथम**न्वगाः** । ’

इत्यादौ ।

31. तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् ।
पक्षाभ्यां **छादयामास** स्नेहात् परमविह्वलम् ।। ’

(रामायणे 4. 57. 6)

अत्र ‘ छन्दसि लिट् ’ (3. 2. 105 । छन्दसि लिट्प्रत्ययो भवति भूते काले इति लिट् ।

एवं सुन्दरकाण्डे (5. 1. 151)

‘ ततस्तस्मिन् क्षणे चाहं **बभूवा**ङ्गुष्ठमात्रकः । ’

इत्यादौ ।

32. आरण्यपर्वणि (3. 238. 9)

‘ **अभूद्** यशः पृथिव्यां मे ख्यातं गन्धर्वतो वधात् । ’

अत्र भवेदिति स्थाने अभूदिति । तथा हि छन्दोध्याये ‘ धातुसंबन्धे लुङलङलिटो वा ’ इति भोजसूत्रम् ।

33. एवं संभवपर्वणि (1. 183. 9)

‘ **मा** वो **विदुः** पार्थिवाः केचनैव
यास्यावहे शिबिरायैव तावत् । ’

इत्यादौ । अत्र खलु विदुरिति वेदनसंबन्धमात्रे लुङि ' सिज-भ्यस्त . . . (3. 4. 109) इत्यादिना झेर्जुस्, अडागमाभावश्च ।

34. संभवपर्वणि (1. 164. 3)

' एतदिच्छाम्यहं श्रोतुं यथावत् **प्रब्रवीहि** मे । '

अत्र ' वा छन्दसि ' (3. 4. 88) । अत्र लोटः सेर्हिरादेशः भवति । सोऽपि च वा भवतीति ईडागमो गुणश्च ।

' ये चान्नमिच्छन्ति **ददाहि** तेभ्यः
परिश्रिता ये परितो मनुष्याः । '
(महाभारते 1. 184. 5)

अत्र एकाराभ्यासलोपयोः छान्दसविकल्पाद् ददाहीति रूपम् । एवम्,

' अर्धं च भीमाय **ददाहि** भर्त्रे '
(महाभारते 1. 184. 6)

इत्यादौ ।

35. ' तपसा निर्जितौ शश्वदजेयावमरैरपि ।
रागद्वेषावुभौ यस्य चरणौ **संववाहतुः** ।। '
(महाभारते 1. 164. 5)

अत्र ण्यन्तादपि वहो ' कास्प्रत्ययाद् . . . ' (3. 1. 35) इत्यादिना आंप्रत्ययः छान्दसविकल्पान्न भवति । पुनरतुसि णेर्लोपः द्वित्वादि च ।

36. ' तदर्हयि त **ददध्वं** सन्तः सत्यानृशंस्यतः । '

अत्र भौवादिकस्य 'दद दाने' इत्यस्य प्रयोगः । न तु दाञः श्लुविकरणस्य । तस्य हि दद्ध्वमिति रूपम् ।

37. उत्तररामायणे (7. 62. 2)

'ऋषयो राघववचः श्रुत्वा वै सर्व एव ते ।
**निवेदयां** तदा **चक्रु**र्लवणस्य विचेष्टितम् ॥'
'आम्कृञो व्यवधानेन प्रयोगः छान्दसो भवेत् ।
भाषायामपि केषांचिन्मतेनोभयथा किल ॥'

38. श्रीभागवते,

'यद्यदायु**धमादद्यात्** तत्सर्वं सोऽच्छिनद् विभुः ।'

अत्र लिटो लुङो वा लङो वा स्थाने लिङः । 'व्यत्ययो बहुलम्' (3. 1. 85) इति लकाराणामपि व्यत्ययात् ।

39. एवं संभवे (1. 77. 23)

'ययातिः स्वपुरं **यायादनु**ज्ञातो महात्मना ।'

इत्यादौ । युद्धकाण्डे (6. 90. 16)

'ह**रीनभ्यहनत्** क्रुद्धः परं लाघवमास्थितः ।'

अत्र 'अदिप्रभृतिभ्यः शपः' (2. 4. 72) इति लुग् न भवति । कथम्? 'बहुलं छन्दसि ।' (2. 4. 73) अत्रादादिभ्यः शपो बहुलं लुक् स्यात् ।

40. एवं युद्धकाण्डे (6. 54. 22)

'**शयामहे** वा निहताः पृथिव्यामल्पजीविताः ।'

किष्किन्धाकाण्डे (4. 54. 7)

Indian ... 115274 12.8.04

'आर्यः को **विश्वसेत्** प्राज्ञस्तत्कुलीनो जिजीविषुः ।'

इत्यादौ च । जगन्नाथस्तुतौ

'जगत्कुसुमसंतानवसन्तो भृशसन्ततः ।
कृपातोयधिवीचीभि**र्दातु** देवः सुखानि वः ।।'

अत्र 'बहुलं छन्दसि' (2. 4. 76) छन्दसि जुहोत्यादिभ्यो बहुलं श्लुः स्यात् । यत्रोक्तस्तत्र न भवति, अन्यत्र भवति । अनेन 'विवष्टि' 'विवक्ति' इत्याद्यपि सिद्धम् ।

41. 'राजानं रमयामास यथा **रम्येत** सो विभुः ।'
(महाभारते, 1. 92. 41)

अत्र 'व्यत्ययो बहुलम्' (3. 1. 85) यथायथं शबादयो विकरणा विहितास्तेषां छन्दसि विषये बहुलं व्यत्ययो भवति । व्यतिगमनं व्यत्ययः । व्यतिहारः विषयान्तरे विधानम् । क्वचिद् द्विविकरणता, क्वचित् त्रिविकरणता । अतः शब्विषये श्यन् । एवं युद्धकाण्डे (6. 55. 96) 'जिह्वया **परिलिह्यन्तं** शोणितं शोणितोक्षितम्' इत्यादौ ।

42. संभवपर्वणि (1. 209. 19 fn. 2042)

'इत्युक्त्वा नारदः सर्वांस्तत्रैवा**न्तरधीयत** ।' अत्र श्लुविषये श्यनि 'घुमास्था . . .' (6. 4. 66) इत्यादिनेकारादेशः । सुप्तिङुपग्रहेत्यादिना कर्तृव्यत्ययेन कर्मणि यकि रूपं वा। एवं 'सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चा**न्तरधीयताम्**' इत्यादौ ।

43. आश्वमेधिके (14. 9. 61)

' नासौ देवं याजयित्वा महेन्द्रं

मर्त्यं सन्तं याजयन्नद्य **शोभेत्** । '

अत्र शविषये शप् । ' शुभ शुम्भ शोभार्थे ' इति तौदादिको धातुः । शोभते रूपग्रहव्यत्ययेन रूपं वा ।

44. ' व्याध मा जीव **मा मर** '

इत्यत्र शविषये शप् ।

45. संभवे (1. 71. 36)

' त**न्मा शुचो मा रुद** देवयानि

न त्वादृशी मर्त्यमनु प्रशोचेत् । '

अत्र तु ' व्यत्ययो बहुलम् ' (3. 1. 85) इति च्लेरङादेशः । मा रुदेत्यत्र शब्लुग्विषये शः ।

46. ' गन्धर्वराक्षसौ क्षेत्रे तौ . मा **मा विशङ्किथाः** । अत्र छान्दसविकल्पात् च्लिरेव न भवति । अतो न सिच्प्रसङ्गः । थासः पुनरार्धधातुकसंज्ञकत्वादिडागमः । कथम्? ' छन्दस्युभयथा ' (3. 4. 117) । छन्दसि विषये उभयथा भवति सार्वधातुकमार्धधातुकं च ।

47. सभापर्वणि (2. App. 31. 11)

' प्रभुस्तद् **भुञ्जसे** पुत्र संस्तुतः सूतमागधैः । '

अत्र द्विविकरणता ।

48. श्रीभागवते (1. 1. 1)

' धाम्ना स्वेन सदा निरस्तकुहकः सत्यं परं **धीमहि** । '

अत्र ध्यायतेर्धातोः 'आदेच उपदेशेऽशिति' (6. 1. 45) इत्यात्त्वम्। पुनः 'व्यत्ययो बहुलम्' (3. 1. 85) इति हल्व्यत्ययेन यकारस्य स्थाने अकारः सवर्णदीर्घश्च। 'धा' इति स्थिते लिङि उपग्रहव्यत्ययेन महिङि कृते सीयुटि च 'छन्दस्युभयथा' (3. 4. 117) इत्यार्धधातुकत्वात् शबभावः। सीयुटः सकारलोपं प्रति सार्वधातुकत्वम्। ततः 'आतो लोप इटि च' (6. 4. 64) इत्याकारलोपः। धीमहि इति।

49. संभवे

'कं**समापचिषुः** सत्रं निर्ऋतेः प्रियकाम्यया'।

अत्र 'सन्यङोः' (6. 1. 9) इति द्वित्वस्य छान्दसविकल्पादभावः।

50. '**याचिष्णवो** ऽभिजग्मुस्तांस्तात ब्राह्मणसत्तमान्।' (संभवे 1. 169. 14) अत्र 'भुवश्च' (3. 2. 138) इति चकारस्यानुक्तसमुच्चयार्थत्वाद् याचेरिष्णुच्।

एवं श्रीसहस्रनामनि (श्लो. 29)

'**भ्राजिष्णु**र्भोजनं भोक्ता सहिष्णुर्जगदादिजः।'

इत्यादौ।

संभवे (1. 170. 17)

'वैरायैव ततो न्यस्तं क्षत्रियान् **कोपयिष्णुभिः**।'

अत्र 'णेश्छन्दसि' (3. 2. 137) ण्यन्ताद्धातोः छन्दसि विषये इष्णुच्प्रत्ययो भवति इतीष्णुच्।

51. सुन्दरकाण्डे (5. 8. 37 & fn. 277)

'काचिद् वंशं परिष्वज्य सुप्ता कमललोचना ।
रहः प्रियतमं **गृह्य** सकामा इव कामिनी ॥'

अत्र गृह्येतिपदं छान्दसविकल्पेन । अन्यथा गृहीत्वेत्येव स्यात् । समासेऽनञ्पूर्वे–(7. 1. 37) इत्यादिनोक्तस्य समास इत्यस्यानियमादसमासेऽपि छन्दसि क्त्वो ल्यबादेशः । एवं किष्किन्धाकाण्डे

'**श्राव्य** दोषानसंभूतान् लक्ष्मणो भवेत् ।'

इत्यादौ ।

श्रीभागवते

'तम**पूज्य** जगत्यस्मिन् कः पुमान् सिद्धिमृच्छति ।'

अत्र अपूज्येति पदम् अनञ्पूर्व इत्यस्य छान्दसविकल्पात् ।

किष्किन्धाकाण्डे (4. 30. 57)

'लोकं सुवृष्टया **परितोषयित्वा**
नदीस्तटाकानि च पूरयित्वा ।'

अत्र 'क्त्वापि छन्दसि ।' (7. 1. 38) 'समासेऽनञ्पूर्वे क्त्वा . . .' (7. 1. 37) इत्येतस्य क्त्वा इत्ययमादेशो भवति छन्दसि । अपिशब्दाद् ल्यबपि । एवं संभवे (1. 189. 25)

'तत्र यूयं कर्म कृत्वाविषह्यं
बहूनन्यान् निधनं **प्रापयित्वा** ।'

इत्यादौ ।

'**आनयित्वा** ततश्चैनां दुहितृत्वे न्ययोजयत् ।'
(महाभारते 1. 66. 12)

अत्र 'एकाच उपदेशेऽनुदात्ताद्' (7. 2. 10) इतीट्प्रतिषेधस्य छान्दसविकल्पादिडागमः ।

52. एवं शल्यपर्वणि (9. 34. 50)

'तव शुश्रूषणे युक्ता **वसिष्यामस्**तवाग्रतः ।'

उत्तररामायणे (7. 29. 17)

'ततोऽन्यं देशमासाद्य शक्रं तं **जयितुं** रणे ।'

इत्यादौ ।

शल्यपर्वणि (9. 16. 49)

'यशो विशालं नृपते**र्दधन्ती**'

इत्यत्र दधतेर्भौवादिकस्य रूपं व्यत्ययेन शता ।

53. बालकाण्डे (1. 2. 49)

'तस्याभ्याशे तु मिथुनं **चरन्तम**नपायिनम् ।
ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुदर्शनम् ॥'

अत्र 'व्यत्ययो बहुलम्' (3. 1. 85) इति लिङ्गव्यत्ययः । अन्यथा चरदित्यादि स्यात् । बालकाण्डे (1. 20. 11)

'एषोऽ**स्त्रान् विविधान्** वेत्ति त्रैलोक्ये सचराचरे ।'

अत्र लिङ्गव्यत्ययेन '**अस्त्रान्**' इति, अस्त्राणीति प्राप्ते ।

54. संभवे (1. 58. 9)

'ऋतौ **दाराणि** गच्छन्ति तदा स्म भरतर्षभ ।'

अत्र 'दारान्' इति प्राप्ते दाराणीति । एवमारण्यपर्वणि (3. 277. 38)

'साभिवाद्य पितुः पादौ व्रीडितेव मनस्विनी ।
पितुर्वचनमाज्ञाय निर्जगाम**अविचारयन्** ॥'

इत्यादौ ।

55. (महाभारते 1. 204. 17)

'तस्या हेतोर्गदे भीमे तावुभावप्य**गृह्णताम्** ।

अत्रान्यथा छन्दोभङ्गो भवेदिति भयाद् 'अगृह्णताम्' इति प्रयुक्तम्, 'अगृह्णाताम्' इति प्राप्तम् । 'अगृह्णीताम्' इति प्राप्ते इति वचनं तु न युक्तम् । कल्पनाया गौरवात् । लघुकल्पनैव युक्ता । एवम्

'न चेदेकैकशो राजन् लोकान**प्रतिगृह्णसि** ।'

इत्यादौ ।

सभापर्वणि (2. 58. 5, 67. 18)

'गवाश्वं **बहुधेनू**कमवार्यं तमजाविकम् ।'

अत्र छन्दोभङ्गभयान्मात्रावृद्धिः । पूर्वत्र मात्राह्रासः । एवमारण्यपर्वणि (2. App. 21. 558 post 3. 181. 16)

'आसन् **वर्षसहस्त्रीणस्**तथा पुत्रसहस्त्रिणः ।'

इत्यादौ ।

56. सभापर्वणि (2. App. 30. 29)

'शिवं शर्वं नगं **शूलिं पिनाकिं** कृत्तिवाससम् ।'

इत्यादौ नकारादिर्लुप्तनिर्दिष्टः ।

57. आरण्यपर्वणि (3. 126. 39)

'वृष्टं सस्यसमृध्यर्थम्'

'गच्छ जानीहि कोन्वस्या

नाथ इत्येव कोटिक'। (3. 248. 16)

अत्र आश्य इति निर्दिष्टम्। कोटिकाश्य इति खलु वक्तव्यम्।

58. श्रीभागवते (1. 9. 41)

'**अरिहणमुपपेद** ईक्षणीयो

मम दृशि गोचर एष आविरात्मा।'

अत्र वृत्तपरिपालनार्थमरिहणशब्दे रेफं हकारं चान्तरा इकारो निवेशितः।

# NOTES

Bowing to the supreme Self free from the fluctuations based on extraneous elements, a short discussion is made to the extent possible on the use of some words in the Itihāsa.

If they are defended by merely stating that they are *ārṣa prayoga* (usage by the seers), it will surely imply that they are grammatically wrong or that the speaker is naïve.

Who can speak of a wrong usage in the words of the seer Vālmīki whose poem was praised by the self-born god, the creator, himself?

And how can the sage Vyāsa, the master who studied all the 'sixty grammars' make mistakes in his own works?

(*śabdaśāstrāṇām ṣaṣṭi—the* sixty grammars, not clear.) The correctness of words in the ancient Itihāsa texts has to be granted.

1. तेऽऽत्मानं for ते आत्मानं. The elision of *ā* of *ātman* is allowed in the Veda; because of the author's intimacy with Vedic usages analogical forms are found in Itihāsa texts also.

   द्विजोऽऽत्मानं for द्विज आत्मानं ।

2. The verse is quoted fully in the *Mukhabhūṣaṇa* (p. 12).

   गौरीपूर्णवपुर्गङ्गाकालिन्दीसंगमायितम् ।
   स्वभूस्वयंभूवाराध्यं नमस्यामि त्रियम्बकम् ।।

   (आराध्यं seems better than the reading आशास्यं given there.)

   स्वयंभूवाराध्यं for स्वयंभ्वाराध्यं ।

   In *Mukha*. (p. 12) it is justified by Cāndra rule: इकां यण् व्यवहारमचि ।

   इयङ्वङ्प्रकरणे—*Vārttika* under Pāṇini 6.4.77.

3. अमृतार्थेदं for अमृतार्थे+इदं=अमृतार्थ इदं ।
वर्ततेदं for वर्तते+इदं=वर्तत इदं ।
तेऽऽज्ञया for ते+आज्ञया=त आज्ञया ।
धृतराष्ट्रोऽऽम्बिकेय: for (धृतराष्ट्र:+आम्बिकेय: >) धृतराष्ट्रो+आम्बिकेय:; ed. reads धृतराष्ट्रोऽमनीषी ।

4. नित्य अव्यय: for नित्योऽव्यय: (< नित्य: अव्यय:)
भागीरथ्याहं for भागीरथ्या अहं ।
यस्याहं for यस्या अहं ।

5. पुन रावणं for पुना रावणं (<पुन: रावणं); printed text reads: किं पुनस्तं हि रावणम् ।

6. ततोडुराज: for तत उडुराज: । Critical edn. reads: तदोडुराज: ।

7. समवेतेऽद्भुतेऽनघे for समवेते अद्भुते अनघे; अहोऽद्भुतं for अहो अद्भुतं ।

8. जलस्थलनभौकस: । Here *nabha* is an *a*-ending word. 'प्रायो–' Dissyllabic words ending in *n* or *s* may generally be used as *a*-ending words. Cf. Bhāguri's rule that all words ending in consonants can be used as *ā*-ending feminine words.
जन्मे जन्मे for जन्मनि जन्मनि ।
यक्षरक्षोरगनागनाथा: । Here *rakṣa* is *a*-ending.
पर्वै: for पर्वभि: ।
विशालवक्षौ for °वक्षसौ । Printed text reads: विशालवक्षसौ वीरौ दुर्धर्षौ देवरूपिणौ ।

9. सो व: for स व: ।
सो पितु: for स पितु: ।
एषो राक्षसेश्वर: for एष राक्षसेश्वर: ।

10. नैच्छदार्शंह is needed for metre.

11. The normal form would be: गङ्गायमुनासंगमे ।
शङ्खिन्युङ्खि—पुत्री is given as पुत्रि ।
*kālīdāsa*, if it is not a proper name.

12. (a) वसिष्ठोत्थाय for वसिष्ठ उत्थाय ।

(b) निर्मथ्यमानेव for निर्मथ्यमानादिव । Ed. °मानाद्वा ।

(c) भस्मन् for भस्मनि (cf. व्योमन् for व्योम्नि in the *Ṛgveda*)

(d) मिथुनादेकं for मिथुने एकं ।

(e) स्वर्गादुपरि for स्वर्गस्योपरि ।

(f) वधेनाप्रतिरूपेण for वधादप्रतिरूपात् । Madras ed. reads श्रेयानं मृत्युरिह ।

(g) पुत्रैः for पुत्रेभ्यः ।

(h) ईयुषः for ईयिवांसः (Nom. pl.)

(i) यं–तं for यस्मिन्–तस्मिन् ।

(j) ततोडुराज... *Bhāgavata* 10. 29. 2, quoted above (6) अरुणेन for अरुणैः (करैः) ।

(k) कर्णसौवलैः for कर्णसौवलाभ्यां; see 12 h.

(l) व्रजतीः for व्रजन्त्यः । नुम् is dropped from व्रजन्ती and व्रजती+जस् becomes व्रजतीः ।

(m) यशस्विनीः for यशस्विन्यः ।

13. Quoted in the *Mukhabhūṣaṇam* p. 23. There the genitive by शेषे षष्ठी is defended by संवन्धसामान्यविवक्षा ।
मह्यं for मम ।
तुभ्यं for तव ।

14. मातापितृभ्यां शुश्रूषुः for मातापितरौ शुश्रूषुः ।

15. पतये for पत्ये । *Bhāgavata* 10. 40. 20
पतिना for पत्या ।

16. प्रकृत्यः for प्रकृतयः ।

17. श्रीमिव for श्रियमिव ।
वीरसूं for वीरसुवं ।

18. पुष्करिण्यैः for पुष्करिणीभिः ।

19. पत्नयः for पत्न्यः । Ed. पत्न्यो वै तस्य ।

20. Also quoted in the *Mukhabhūṣaṇam*, p. 61. अभिषेक्तुकाम: is normal. कनीयसं for कनीयांसं ।

21. विजिगीषुणां for विजिगीषूणां ।

22. इतराय for इतरस्मै ।

23. चिन्वन्ति, कम्पयते—Present tense is not intended.
आह (indeclinable) means उवाच (past tense).
पूर्वमुक्तम् । cf. the *Mukhabhūṣaṇam*, pp. 53-4.

24. लिट् by परोक्षे लिट् ।
यथोक्तम्–धात्वर्थस्यैवेत्यादि–quoted in the *Mukhabhūṣaṇam*, p. 54.
धात्वर्थस्यैव भूतादिकालभेदैः समन्वयः ।
न प्रत्ययार्थस्यैते च विवक्षावशवर्तिनः ॥

25. cf. आसाह लिडर्थे—quoted above (23).

26. मा विचारय । There are two negative particles मा and माङ्; the rule माङि लुङ् applies only to the latter.

27. भविता (लुट्) for भवेत् (लिङ्)

28. अयाचं तं *Mahābhārata* 3. 178. 39; *Mukhabhūṣaṇam*, p. 50
सोऽयजत् पृथिवीपालः—ibid., 3. 126. 5, quoted in the *Mukhabhūṣaṇam*, p. 50
शुश्रूषुराचार्यं . . . चकार ibid., 3. 132. 6, quoted in the *Mukhabhūṣaṇam*, p. 50
*Mukhabhūṣaṇam*: अत्र कर्तुः क्रियाफलप्राप्तिर्न विवक्षिता । अतः परस्मैपदम् ।

29. *Rāmāyaṇa*, 4. 53. 21. Printed edition reads: मासः पूर्णो बिलस्थानां हरयः किं न बुध्यते ।
The normal form is हरयो नावबुध्यन्त ।
सुप्तिङुपग्रह quoted in the *Mahābhāṣya* under 3. 1. 85.
पादौ सन्ति—This seems to be a verse intended to criticize the indiscriminate use of option by *bahulam*.

भुञ्जते for भुङ्क्ते ।
गमिष्ये for गमिष्यामि ।
शृणुष्व for शृणु ।
इच्छसे for इच्छसि ।
अभ्यजायन् for अभ्यजायन्त ।
अलभन् for अलभन्त ।
दह्यतां for दह्यमानानां ।
वर्तन्तः for वर्तमानाः ।

30. गमत् for अगमत् । Ed. यदुपुरीमगात् ।
भवन् for अभवन् ।
मा अगमः for मा गमः ।
मा अन्वगाः for मा अनुगाः ।

31. छादयामास—Perfect used in the sense of simple past, without any intention of *paroksa*.
अहं बभूव is similar

32. अभूत् for भवेत् ।

33. मा विद्युः is the reading in the critical ed.

34. प्रब्रवीहि for प्रब्रूहि ।
ददाहि for देहि । Ed. वदस्व, ददस्व

35. संववाहतुः for संवाहयामासतुः ।

36. तदर्ह्यि—quoted in the *Mukhabhūṣaṇam*, p. 49
ददध्वं of the 1st conj. is given instead of दध्वं of the 3rd conj.

37. 'आम्कृञो . . . .' Bhoja's *sūtra*; See also *Mukhabhūṣaṇam* p. 54, where such usages are justified.

38. आदद्यात् used in the place of the past tense.

39. यायात् for ययौ ।
अभ्यहनत् for अभ्यहन् ।

40. शयामहे for शयीमहि ।

विश्वसेत् see the *Mukhabhūṣaṇam*, p. 50, where it is explained as correct.

जगत्कुसुम—This verse from *Jagannāthastuti* is quoted anonymously in the *Mukhabhūṣaṇam*, p. 50.

दातु for ददातु ।

41. रम्येत for रमेत । Ed. यथा रेमे तथैव सः ।

परिलिह्यन्तं for परिलिहन्तं ।

See also *Kāśikā* under 3. 1. 85.

42. अन्तरधीयत for अन्तरदधात् ।

43. शोभेत् for शुभेत् from *śubh* of Tudādi class; or शोभेत from the Bhūvādi root which is Ātmanepada.

44. मा मर 1st conj. usage Vedic.

45. मा शुचः for मा शोचीः ।

मा रुद for मा रोदीः (Aorist)

46. मा विशङ्किथाः for मा विशङ्किष्ठाः

47. भुञ्जसे for भुङ्क्षे deemed a first class root; normally it belongs to the 7th conjugation.

48. धीमहि from *dhyai* for ध्यायामः । Vedic usage (भर्गो देवस्य धीमहि)

49. आपचिषुः for अपचिचीषुः ।

50. याचिष्णुः, भ्राजिष्णुः, कोपयिष्णुः—analogical formations.

51. गृह्य for गृहीत्वा ।

श्राव्य for श्रुत्वा or श्रावयित्वा ।

अपूज्य for अपूजयित्वा ।

परितोषयित्वा for परितोष्य ।

प्रापयित्वा for प्रापय्य ।

आनयित्वा for आनाय्य ।

52. वसिष्यामः for वत्स्यामः । Ed. वत्स्यामो हि तवाश्रमे ।
जयितुं for जेतुं । Ed. शक्रःसंत्यज्य रावणम् ।
दधन्ती for दधमाना 1st conj.

53. चरन्तं goes with मिथुनं and should be neuter
अस्त्रान् for अस्त्राणि ।

54. दाराणि for दारान् Ed. दारांश्च ।
अविचारयन् for अविचारयन्ती Ed. अविचारितम ।

55. अगृह्णतां for अगृह्णीतां ।
अप्रतिगृह्णसि for अप्रतिगृह्णासि ।
बहुधेनूकं for बहुधेनुकं ।
वर्षसहस्रीणः for वर्षसहस्रिणः ।

56. शूलि for शूलिनं ।
पिनाकि for पिनाकिनं ।

57. वृष्टं सस्यसमृद्ध्यर्थं । There seems to be a gap after this.
कोटिक for कोटिकाश्य (as भीम for भीमसेन).

58. अरिहणं for अर्हणं

[*N. B.* add to note 7 above]
अहोऽद्भुतं मया दृष्टं दुःखपात्री ह्यहं विभो ।
(*Liṅgapurāṇa*, 1. 64. 37.)

---

## ACKNOWLEDGEMENT

Our thanks are due to the Curator, Government Oriental Manuscripts Library, Madras, and Kerala University Manuscripts Library, Trivandrum, for use of their manuscripts.

Indian Institute of Advanced Studies
115274
12.8.04